International Journal of Sanskrit Research 2021; 7(1): 148-150

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 148-150
© 2021 IJSR
www.anantaajournal.com
Received: 09-11-2020
Accepted: 18-12-2020

**Satish Chandra Das**
Research Scholar,
Department of Sanskrit,
Pondicherry University,
Pondicherry, India

**Corresponding Author:**
**Satish Chandra Das**
Research Scholar,
Department of Sanskrit,
Pondicherry University,
Pondicherry, India

# आधुनिकसंस्कृताचार्याणां काव्यस्य प्रयोजनम्

**Satish Chandra Das**

## प्रस्तावना

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति प्राग्वदुक्तिदिशा काव्यप्रणयनेऽपि भवितव्यमेव केनचित्प्रयोजनेन। भगवान् भरतस्य कालात् काव्यस्य प्रयोजनप्रसङ्गे विभिन्नानां आचार्याणां मतानि दरीदृश्यन्ते। यशार्थौ प्राप्तौ कविदृष्ट्या काव्यस्य प्रयोजनं भवितुमर्हति परन्तु प्रयोजनविषये कविनाम् आग्रहविषयस्योपरि स्वभावप्रेरितप्रवृत्तस्य मन्दता परिदृश्यते, फलतः काव्यनिर्माने काव्य अभिनिवेशात् शिथिलता दृश्यते।

'उपदेशः' काव्यस्य प्रयोजनमिति मम्मटेन 'कान्तासम्मिततयोपदेशयुजे' इति पदस्य व्यवहारः कृतः, अत्र ज्ञायते उपदेशप्राप्तिः कविभिः न भवन्ति, परन्तु कविना काव्यरूपेण जीवनगतसत्यस्य यः प्रस्तुतिः तत् सहृदयस्य स्वतः एवोपदेशः । एतेन प्रकारेण काव्यस्य प्रयोजनविषये विभिन्नानि तत्वानि आधुनिकसाहित्याचार्योषु तेषां ग्रन्थे अपि परिदृश्यन्ते ।

काव्यस्य प्रयोजनविषये काव्यासत्यालोक इति ग्रन्थस्य रचनाकारः आचार्यब्रह्मानन्दशर्मा कथयति –

> "प्रवृत्तिर्या कवेः सत्ये, काव्ये सा परिवर्तते ।
> नात्र प्रयोजनं किञ्चित्, स्वभावस्तु प्रवर्तते ॥"[i]

काव्यस्य कानि प्रयोजनानीति विवेचनात् प्राक् काव्ये प्रयोजनस्य अनिवार्यता विचारणीयम् । आचार्यब्रह्मानन्दशर्मणः मतानुसारं काव्यरचना प्रवृत्तिः द्वौ प्रकारौ, यथा स्वभावप्रेरितः एवं प्रयोजनप्रेरितश्च । तस्य मतानुसारं काव्ये प्रयोजनस्य आवश्यकता नास्ति । अतः प्रयोजनाभावे एषा काव्यविषया प्रवृत्तिः स्वभावप्रेरिता भवति,यः मुलतः एकतः कविगतः,अपरश्च सहृदयगतः भवति । कविगतः स्वभावः सत्योन्मुख जातः, यः काव्यगतदृष्टिपक्षस्य विस्तारः भवति । आधुनिकाचार्याणां मतानुसारणं काव्यस्य प्रयोजनं यदि मोक्षः प्राप्तिः भवति,

किन्तु मोक्षः तु आध्यात्मिकशास्त्रस्य विषयः भवति, अतः काव्येन सह कोऽपि सम्बन्धः नास्ति, परन्तु कोऽपि यदि अयं सम्बन्धे आग्रहः प्रकाशं करोति तर्हि मोक्षः एकः अलौकिकवस्तु न इति स्वीकृत्वा लौकिकवस्तु स्वीकार्यम् ।

अधुना त्रिवेणीकवि आचार्यः अभिराजराजेन्द्रमिश्रः काव्यस्य प्रयोजनं विषये अद्वितीयं तथ्यस्य प्रतिष्ठापनं कृतवन्तः, तस्य मतानुसारणं आचार्यमम्मटस्य षट् प्रयोजन कदापि न ग्राह्यणीयम्, अर्थप्राप्तिः सम्बन्धे सः कथयति कोऽपि केषाञ्चित्कवीनां काव्यरचनयाऽर्थप्राप्तिस्सम्भवेत् परन्तु न सर्वेषां कृते । धनप्राप्तिः कारणात् कदापि कवयः स्वाभिमानं भवन्ति, किन्तु यदा कवि स्वभावतः निराकांक्षः निर्लोभः भवति, तदा कवीणां समस्तवस्तु शुन्यं परिदृश्यते । अभिराजराजेन्द्रमिश्राचार्यैः उक्तम् – 'मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः? आत्मारामतया जीवतां कवितल्लजानां क्वाऽपरितोषः?' ।

शिवेतरक्षतिप्रसङ्गे मिश्रोऽभिराजः कथयति देवाराधना-स्तोत्रादीनां रचनया अमङ्गलदूरीकरणं केषाञ्चित्कवीनामजायतेति परन्तु एतत् काव्यप्रयोजनस्य उचित्यं क्षीणजातः । कारणं महाकाव्यम्, खण्डकाव्यम्,चम्पूकाव्यम्, नाटकादिनां सर्वं देवतापरायनं न भवति, तर्हि कथं भवितुं शक्यते । इत्थं स्तोत्रमात्रेन साध्य अमङ्गलदूरिकरणम् काव्यस्य प्रयोजनं न साधयति ।

सद्यःपरिनिर्वृतिरपि सर्वदा काव्यस्य प्रयोजनं न भवति, कारणं काव्यस्य आनन्दानुभूतिः सहृदयपाठक वा श्रोता बर्गेषु जायते,परन्तु असहृदयमनुष्यः कथं प्राप्तुं शक्यते विशेषरूपेन व्यङ्ग्यार्थयुक्तः काव्यस्य कथमानन्दं प्राप्तुं शक्यते । यथा शार्ङ्गधरपद्धतावुद्धतं महाकविबाणभट्टपद्यम् –

"मुखमात्रेण काव्यस्य करोत्यहृदयो जनः ।
छायामच्छामपि श्यामां राहुस्तारापतेरिव ।।"[ii]

व्यवहारज्ञानमपि काव्यप्रयोजनं न इति कस्यापि वैमत्यम् । काव्यानुशीलनेन व्यवहारज्ञानं कस्य जायते ? प्रणेतुः कवेः पाठकस्य श्रोतुर्वा ? इति अयं प्रश्ने आधुनिकाचार्याः पाठकस्य व्यवहारज्ञानं स्वीकृतवान् कारणं न चन्द्रस्तथा चन्द्रिकासौख्यमनुभवति यथा लोकः, अपि च न प्रदीपः स्वयमेव प्रभये न उपकृतः भवति । इत्थं यः अभिप्रायः भवति यत् काव्यानुशीलने व्यवहारज्ञानं पाठकस्य जातः न तु स्वयं काव्यकारस्य ।

कान्तासम्मिततयोपदेशयुजेति काव्यस्योपदेशेन यदि शिक्षाप्राप्तं सति तर्हि प्रभुसम्मितः एवं मित्रसम्मितशैलिनाम् उपदेशेन वेदशास्त्रः तथा नीतिशास्त्रनां प्राप्तः ज्ञानस्य कोऽर्थः? भट्टिः प्रणीतः रावणवधमहाकाव्यं प्रभुसम्मितेन व्याकरणं पाठयति तथा हरदत्तसूरिः कृतः राघवनैषधीयादि कान्तासम्मितभिन्नः काव्यस्य ज्ञानं सरलतया पाठकाः पाठयन्ति ।

अभिनवकाव्यालंकारसूत्रकारः मुक्तीति काव्यस्य प्रयोजनं कथ्यते, "मुक्तिस्तस्य प्रयोजनम्।" [iii] मिश्रानुसारं मुक्तिः मृत्युः परं प्राप्नोति,यशः,अर्थप्राप्तिः,अमङ्गलनाशः,सद्यः आनन्दानुभूतु तथा कान्तासम्मितोपदेश केवलं इह जगते उपभोग्यस्य विषयः भवति, तर्हि मुक्तिः कथं काव्यप्रयोजनत्वं सम्भवति ।

अतः एतानि सर्वानि काव्यस्य प्रयोजनस्य अधिकारः यदि न वर्तन्ते, तर्हि आधुनिकाचार्येषु मतानुसारं काव्यस्य प्रयोजनं किम् ? एतत् प्रश्ने कथयति यशः एव काव्यस्य हेतुः । कारणं केवलमात्रः यशः कविनां युगयुगान्तरे स्वर्गवासः परमपि स्मरणीयं स्थापयेत् । वाग्भट्टः कथयति - कीर्तिमात्रैकप्रयोजने काव्ये श्रद्दधाति ।

आचार्यः रहसविहारी द्विवेदी काव्यस्य प्रयोजनं सम्बन्धे कथयति –

"नव्यकाव्यविधोन्मेषं व्याङ्ग्योक्तिं विकृतौ तथा ।
राष्ट्रभक्तिं युगौचित्यं पर्यावरणचेतनाम् ।।
राष्ट्रस्वातन्त्र्यवीराणां चरितं चाराध्यमीश्वरम् ।
समुद्दिश्याधुना काव्यं कुर्वन्ति कवितल्लजाः।।"[iv]

अथः आधुनिकाचार्याः यशः विनाऽपि राष्ट्रभक्तिः, पर्यावरणचेतनादि काव्यस्य प्रयोजनं नतूनकविनां स्वीकुर्वन्ति ।

**उपसंहारः**

"न धनाय न पुण्याय व्यवहाराय नाऽपि वा ।
न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः ॥"[v]

कविः न तु धनस्य प्राप्तार्थं, पुण्यलाभार्थं न तु व्यवहारज्ञानाय तथा आनन्दप्राप्तार्थं काव्यस्य प्रणयनं करोति, ते तु केवलं यशः तथा राष्ट्रभक्त्यादि प्राप्तार्थं काव्य रचना करोति । वस्तुतः काव्यरचना व्यक्तिनां पूर्वजन्मेन संस्कारेण प्रेरितं करोति, यः प्रधानतः स्वभावजः कर्मः काव्यरचनायां प्रबुद्धं करोति, यावत् कालं पर्यन्तं कविः काव्यरचना न करोति तावत् कालं पर्यन्तं तस्य मनसि शान्तिं अनुभवं न भवति ।

"वस्तुतस्तस्य कर्मैतत् संस्कारोत्थं स्वभावजम् ।
यदकृत्वा क्षणं यावन्नासौ शमधिगच्छति ॥"[vi]

अतः पुर्वे काव्यप्रयोजनस्य ये ये कारणानि आचार्याः कथयन्ति तत् अधुना केवलं षट् प्रयोजनवर्जयित्वा समाजे बृहत् प्रयोजनस्य कारणं भवति ।

**सन्दर्भः**

1. काव्यसत्यालोकः (५/६९)
2. सुभाषितावलि
3. अभिनवकाव्यालंकारसूत्रम् - राधावल्लभत्रिवेदी
4. साहित्यविमर्शः - रहसविहारी द्विवेदी
5. अभिराजयशोभूषणम् (१/२३)
6. अभिराजयशोभूषणम् (१/२४)

**ग्रन्थसूची**

1. मिश्रोऽभिराजः, राजेन्द्रः. *अभिराजयशोभूषणम्.* वैजयन्तप्रकाशनम्. इलाहाबादम् (उ.प्र.) - २००६.
2. द्विवेदी, रहसविहारी. *साहित्यविमर्शः.* राष्ट्रीय संस्कृत संस्थान. नई दिल्ली.२०००.
3. त्रिपाठी, राधावल्लभ. *अभिनवकाव्यालंकारसूत्रम्.* सम्पूर्णानन्द संस्कृत विश्वविद्यालयः. वाराणसी-२००५.
4. शर्मा, ब्रह्मानन्दः. *काव्यसत्यालोकः.* राजस्थान-संस्कृत-अकादमी. जयपुर- २०१३.
5. पाण्डे, मिथिलेशः. *आधुनिक संस्कृत साहित्य का इतिहास.* राधा पब्लिकेशन्स. नई दिल्ली-२०१९.

---

[i] काव्यसत्यालोकः(५/६९)
[ii] सुभाषितावलि
[iii] अभिनवकाव्यालंकारसूत्रम् - राधावल्लभत्रिवेदी
[iv] साहित्यविमर्शः - रहसविहारी द्विवेदी
[v]अभिराजयशोभूषणम्(१/२३)
[vi] अभिराजयशोभूषणम्(१/२४)